प्राणस्त्वेवंविधं कुर्य्यात् प्राणिनां प्राणधारकः ।
प्राणनं कुरुते यस्मात् तस्मात् प्राणः प्रकीर्त्तितः ॥
प्राणो हि भगवान् ईशः प्राणो विष्णुः पितामहः ।
प्राणेन धार्य्यते लोकः सर्व्वं प्राणमयं जगत् ॥
इन्द्रियाणि प्रवर्त्तन्ते यावत् प्राणानिलो हृदि ।
नष्टे न दृश्यते सर्व्वं तस्मात् प्राणन्तु रक्षयेत् ॥
रज्जुबद्धो यथा श्येनो गतोऽप्याकृष्यते पुनः ।
गुणबद्धस्तथा जीवः प्राणापानेन कृष्यते ॥
अपानयंस्तथाहारं मनुजानां यतोऽधमः ।
शुक्रमूत्रशके वायुरपानस्तेन कीर्त्तितः ॥ * ॥
पीतं भक्षितमाघ्रातं रक्तं पित्तकफानिलान् ।
समं नयति गात्रेषु समानो नाम मारुतः ।
समानोऽग्निसमीपस्थः कोष्ठे च वाति सर्व्वतः ।
अन्नं गृह्णाति पचति विरेचयति मुञ्चति ॥*॥
स्पन्दयत्यधरं वक्त्रं नेत्रगात्रप्रकोपनः ।
उद्वेजयति मर्म्माणि उदानो नाम मारुतः ॥*॥
व्यानो विनामयत्यङ्गं व्यानो व्याधिप्रकोपनः ।
प्रीतेर्व्विनाशकश्चायं वाहुकोत्पादकस्तथा ॥"*॥
वायूनां स्थानानि ।
"शिरसो नासिकाप्रान्तमुदानस्थानमुच्यते ।
नाभेः पादतलं यावदपानस्य प्रकीर्त्तितम् ॥
शरीरव्यापको व्यानः प्राणः सकलनायकः ।
उद्गारे नाग इत्युक्तः कूर्म्मश्चोन्मीलने स्थितः ॥
कृकरः क्षुधिते चैव देवदत्तो विजृम्भिते ।
धनञ्जयः स्थितो मेढ्रे मृतस्यापि न मुञ्चति ।
भूतावासिस्ततस्तस्याजायतेन्द्रियगोचरात् ॥*॥
उत्साहोच्छ्वासनिःश्वासचेष्टाधातुगतिः समाः ।
समो मोक्षे गतिमतां वायोः कर्म्माविकारजम् ॥"
इति सुखबोधः ॥ * ॥
अथ दिग्भववायुगुणाः ।
"प्राग्वातो मधुरः क्षारो वह्निमान्द्यकरो गुरुः ।
वैरस्यगौरवौष्ण्यानि करोत्यप्स्वोषधीषु च ॥
भयोत्पित्तक्षताढ्येषु रागश्वयथुदाहकृत् ।
सन्निपातज्वरश्वासत्वग्दोषार्शोविषक्रिमीन् ।
कोपयेदामवातञ्च घनसंघातकारणम् ॥
दाक्षिणो मारुतो बल्यश्चक्षुष्यः शस्यघातकः ।
मधुरश्चाविदाही च कषायानुरसो लघुः ॥
रक्तपित्तप्रशमनो न च मारुतकोपनः ।
गण्डूपदादिकीटानां जनकः प्राणकारकः ॥
पाश्चिमोऽग्निवपुर्व्वर्णबलारोग्यविवर्द्धनः ।
कषायः शोषणः स्वर्य्यो रोचनो विशदो लघुः ॥
अपां लघुत्ववैशद्यशैत्यवैमल्यकारकः ।
सर्व्वद्रव्येष्वभिव्यक्तप्रभावरसवीर्य्यकृत् ।
व्रणसंरोपणश्लक्ष्णो दाहशोषतृषापहः ॥
औत्तरो मारुतः स्निग्धो मृदुर्मधुर एव च ।
कषायानुरसः शीतः सर्व्वदोषप्रकोपणः ॥
क्षीणक्षतविषार्त्तानां हितो दाहतृषापहः ।
शीताधिकः समीहारः सविद्युत्स्तनयित्नुमान् ॥
विष्वग्वायुरनायुष्यः प्राणिनां नैकदोषकृत् ।
सर्व्वर्त्तुनिन्दको हन्ता व्याध्युत्पादपुरःसरः ॥"*॥

व्यजनवायुगुणाः ।
"मूर्च्छादाहतृषास्वेदश्रमघ्नो व्यजनानिलः ।
तालवृन्तभवो वातस्त्रिदोषशमनो लघुः ॥
वंशव्यजनजो वातो रूक्षोष्णो वातपित्तदः ।
वालव्यजनमोत्थं मक्षिकादीन् अपोहति ।
मायूरा वस्त्रजा वैत्रा वाता दोषत्रयापहाः ॥"
इति राजवल्लभः ॥ * ॥
अपि च । तत्र वायोः स्वरूपमाह ।
"दोषधातुमलादीनां नेता शीघ्रः समीरणः ।
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः ॥"
नेता स्थानान्तरे प्रापयिता । शीघ्रः आशुकारी । अन्यच्च ।
"उत्साहोच्छ्वासनिःश्वासचेष्टावेगप्रवर्त्तनैः ।
सम्यग्गत्या च धातूनामिन्द्रियाणाञ्च पाटवैः ॥
अनुगृह्णात्यविकृतो हृदयेन्द्रियचित्तधृक् ।
रजोगुणमयः सूक्ष्मो रूक्षः शीतो लघुश्चलः ॥
खरो मृदुर्योगवाही संयोगादुभयार्थकृत् ।
दाहकृत्तेजसा युक्तः शीतकृत् सोमसंश्रयात् ॥
विभागकरणाद्वायुः प्रधानं दोषसंग्रहे ।
पक्वाशयकटीसक्थिश्रोत्रास्थिस्पर्शनेन्द्रियम् ।
स्थानं वातस्य तत्रापि पक्वाधानं विशेषतः ॥"
एको वायुः पित्तवन्नामस्थानकर्म्मभेदैः पञ्चविधः ॥ * ॥ तेषां वायूनां नामान्याह ।
"उदानस्तद्वत् प्राणः समानोऽपान एव च ।
व्यानश्चेतानि नामानि वायोः स्थानप्रभेदतः ॥"
अथोदानादीनां स्थानान्याह ।
"कण्ठे हृदि तथाधस्तात् कोष्ठवह्नेर्मलाशये ।
सकलेऽपि शरीरेऽसौ क्रमेण पवनो वसेत् ॥"
अथ तेषां कर्म्माण्याह ।
"उदानो नाम यस्तूर्द्ध्वमुपैति पवनोत्तमः ।
तेन भाषितगीतादिप्रवृत्तिः कुपितस्तु सः ।
ऊर्द्ध्वजत्रुगतान् रोगान् विदधाति विशेषतः ॥
यो वायुः प्राणनामासौ मुखं गच्छति देहधृक् ।
सोऽन्नं प्रवेशयत्यन्तः प्राणांश्चाप्यवलम्बते ॥
प्रायशः कुरुते दुष्टो हिक्काश्वासादिकान् गदान् ।
आमपक्वाशयचरः समानो वह्निसङ्गतः ॥
सोऽन्नं पचति तज्जांश्च विशेषान् विविनक्ति हि ॥"
तज्जानित्याह अन्नजान् । रसमलमूत्रादीन् पृथक्करोतीत्यर्थः ।
"स दुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि ।
पक्वाशयालयोऽपानः काले कर्षति चाप्ययम् ॥
समीरणः शकृन्मूत्रशुक्रगर्भार्त्तवान्यधः ।
क्रुद्धस्तु कुरुते रोगान् घोरान् वस्तिगुदाश्रयान् ।
शुक्रदोषप्रमेहांश्च व्यानापानप्रकोपजान् ॥"
स च ।
"कृत्स्नदेहचरो व्यानो रससंवहनो यतः ।
स्वेदासृक्स्रावणश्चापि पञ्चधा चेष्टयत्यपि ॥
गत्यपक्षेपणोत्क्षेपनिमेषोन्मेषणादिकाः ।
प्रायः सर्व्वाः क्रियास्तस्मिन् प्रतिबद्धाः शरीरिणाम् ॥

प्रस्पन्दनं चोद्वहनं पूरणञ्च विरेचनम् ।
धारणञ्चेति पञ्चैताश्चेष्टाः प्रोक्ता नभस्वतः ॥
क्रुद्धः स कुरुते रोगान् प्रायशः सर्व्वदेहगान् ।
युगपत् कुपिता एते देहं भिन्द्युरसंशयम् ॥"
देहं भिन्नं कुर्य्युर्मारयेयुरित्यर्थः । इति भावप्रकाशः ॥ * ॥ ( असुरविशेषः । यथा, हरिवंशे । २ । ८५ ।
"दीर्घजिह्वोऽर्कनयनो मृदुचापो मृदुप्रियः ।
वायुर्गरिष्ठो नमुचिः शम्बरो विजयो महान् ॥")

वायुकेतुः, स्त्री, ( वायुः केतुर्ध्वजो वाहनं वा यस्याः । ) धूलिः । इति हारावली । १५८ ॥

वायुगण्डः, पुं, अजीर्णः । इति त्रिकाण्डशेषः ॥

वायुगुल्मः, पुं, (वायुना कृतो गुल्म इव ।) अम्भसां भ्रमः । इति त्रिकाण्डशेषः ॥

वायुदारुः, पुं, (वायुना दीर्य्यते इति । दॄ+उण् ।) मेघः । इति त्रिकाण्डशेषः ॥

वायुपुत्त्रः, पुं, ( वायोः पुत्त्रः । ) भीमः । इति धनञ्जयः ॥ हनूमान् । यथा,—
"हनूमानञ्जनासूनुर्वायुपुत्त्रो महाबलः ।"
इति तस्य द्वादशनामस्तोत्रम् ॥

वायुफलं, क्ली, ( वायुना फलति प्रतिफलतीति । फल्+अच् । ) शक्रधनुः । (वायोः फलमिव ।) करका । इति मेदिनी । ले, १६४ ॥

वायुभक्षः, पुं, ( वायुर्भक्ष्योऽस्येति । ) सर्पः । इति राजनिर्घण्टः ॥ वातभक्षके, त्रि ॥ ( यथा, गो० रामायणे । ३ । १५ । १२ ।
"स हि तेपे तपस्तीव्रं मन्दकर्णिर्महामुनिः ।
दशवर्षसहस्राणि वायुभक्षः शिलासनः ॥")

वायुवर्त्म, [न्] क्ली, ( वायोर्वर्त्म । ) आकाशः । इति शब्दचन्द्रिका ॥

वायुवाहः, पुं, ( वायुना उह्यते इति । वह्+घञ् । ) धूमः । इति हेमचन्द्रः । ४ । १६६ ॥

वायुवाहिनी, स्त्री, ( वायुं वहतीति । वह्+णिनिः । ङीप् । ) वायुसञ्चारिणी शिरा । इति वैद्यकम् ॥

वायुसः, पुं, मत्स्यविशेषः । कालवायुसपोना इति भाषा । तस्य गुणाः ।
"वायुसो बृंहणो हृद्यो मधुरो धातुवर्द्धनः ॥"
इति राजवल्लभः ॥

वायुसखः, पुं, (वायोः सखा । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् । ) अग्निः । इति भरतः ॥

वायुसखा, [खि] पुं, (वायुः सखा यस्येति विग्रहे टजभावात् । "अनङ् सौ ।" ७ । १ । ९३ । इति अनङादेशः । ) अग्निः । इत्यमरः ।१।१।५८॥

वाय्वास्पदं, क्ली, ( वायूनामास्पदं सञ्चरणस्थानम् । ) आकाशः । इति धनञ्जयः ॥

वार्, क्ली, ( वारयतीति । वृञ्+णिच्+क्विप् ।) जलम् । इत्यमरः । १ । १० । ३ ॥ ( यथा, भागवते । १० । ३३ । २२ ।
"गन्धर्व्वपालिभिरनुद्रुत आविशद् वाः
श्रान्तो गजीभिरिभराडिव भिन्नसेतुः ॥")